# Ananta Stava

# અનન્તસ્તવઃ

## Document Information

Text title : Ananta Stava

File name : anantastavaH.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 1 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# Ananta Stava

## અનન્તસ્તવઃ

યેનેદં જગદખિલં ધૃતં વિધાત્રા
    વિશ્વં યજ્જઠરગતં યુગાન્તકાલે ।
યો વેદાનવતિ તમેત્ય મત્સ્યરૂપં
    તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૧॥

યો લોકાનસૃજદનાદ્યનન્તરૂપો
    વિશ્વાત્મા વિગતતમોરજોભિરીડ્યઃ ।
ધૃત્વેમાં કમઠવપુર્મહીં સૃજન્તં
    તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૨॥

યઃ પૃથ્વીમસુરભયાદ્રસાતલસ્થા-
    મુદ્ધર્તું ખુરનિકરક્ષતાસુરૌઘઃ ।
વારાહીં તનુમભજત્ ત્રયીનિવાસ-
    સ્તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૩॥

હૈરણ્યં કુલિશદૃઢૈ પુરા નખાગ્રૈ-
    ર્વક્ષો યઃ સપદિ વિદારયાઞ્ચકાર ।
રહ્લાદપ્રિયહિતકૃન્નૃસિંહરૂપ-
    સ્તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૪॥

સ્વર્લોકસ્થિતિકરણાય યો ધરિત્રીં
    ત્રેધા વિક્રમિતુમયાચતાસુરેશમ્ ।
ભૂત્વા વામનતનુરીશ્વરં સુરાણાં
    તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૫॥

યઃ ક્ષત્રં નિહિતપરશ્વધેન સર્વં
    છિત્વા તત્ક્ષતજજલેન કર્મ પિત્ર્યમ્ ।
ચક્રે વિક્રમવિભવૈકસમ્પદીડ્ય-
    સ્તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૬॥

યો લોકત્રયયવનવહ્નિમીશ્વરાણા-
    મીશાનો દશવદનં રણે નિહન્તુમ્ ।
રામો દાશરથિરભૂદુદારવીર્ય-
    સ્તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૭॥

યઃ પૃથ્વીમસુરભરાતિભઙ્ગુરાર્તા-
    મુદ્ધર્તું મુસલહલાયુધો બભૂવ ।
કાલિન્દીકર્ષણદર્શિતાતિવીર્ય-
    સ્તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૮॥

કંસાદીંસ્ત્રિદશરિપૂનપાચિકીર્ષુ-
    ર્યઃ પૃથ્વ્યામિહ યદુનન્દનો વભૂવ ।
બાલાર્કદ્યુતિવિકસત્સરોજવક્ત્રં
    તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૯॥

પાષણ્ડાન્ કલિકલુષીકૃત સ્વધર્મા-
    નિશ્શેષં સપદિ નિરાકરિષ્ણુરીશઃ ।
યઃ કલ્કી ભવતિ નિતાન્તઘોરરૂપં
    તં દેવં શરણમહં ગતોઽસ્મ્યનન્તમ્ ॥ ૧૦॥

(This stotra contains ten shlokas and describes
the ten inscarnations of Vishnu.)

ઇતિ સુભદ્રાકૃતઃ અનન્તસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Mohan Chettoor

*Ananta Stava*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*